# *શ્રી રામ રક્ષા સ્તોત્ર*

શ્રી ગણેશાય નમ:

અસ્ય શ્રી રામ રક્ષા સ્તોત્ર મંત્રસ્ય
બુધકૌશિક ઋષિ:
શ્રી સીતારામચંદ્રો દેવતા
અનુષ્ટુપ છંદ:
સીતા શક્તિ:
શ્રીમદ હનુમાન કીલકમ
શ્રી રામચંદ્ર પ્રીત્યર્થે રામ રક્ષા સ્તોત્ર જપે વિનિયોગ:

**અથ ધ્યાનમ**

ધ્યાયેત આજાનુબાહું ધૃતશરધનુષં બદ્ધપદ્માસનસ્થમ ।
પીતં વાસો વસાનં નવકમલદલસ્પર્ધિનેત્રં પ્રસન્નમ ।
વામાંકારૂઢ સીતામુખકમલમિલલ્લોચનં નીરદાભમ ।
નાનાલંકારદીપ્તં દધતમુરુજટામંડનં રામચંદ્રમ ॥

**ઈતિ ધ્યાનમ**

ચરિતં રઘુનાથસ્ય શતકોટિ પ્રવિસ્તરમ ।
એકૈકમ અક્ષરં પુંસાં મહાપાતકનાશનમ ॥ 1 ॥

ધ્યાત્વા નીલોત્પલશ્યામં રામં રાજીવલોચનમ ।
જાનકીલક્ષ્મણોપેતં જટામુકુટમંડિતમ ॥ 2 ॥

સાસિતૂણધનુર્બાણપાણિં નક્તંચરાન્તકમ ।
સ્વલીલયા જગત્રાતું આવિર્ભૂતં અજં વિભુમ ॥ 3 ॥

રામરક્ષાં પઠેત પ્રાજ્ઞ: પાપઘ્નીં સર્વકામદામ ।
શિરોમે રાઘવ: પાતુ ભાલં દશરથાત્મજ: ॥ 4 ॥

કૌસલ્યેયો દૃશૌ પાતુ વિશ્વામિત્રપ્રિયશ્રુતી ।
ઘ્રાણં પાતુ મખત્રાતા મુખં સૌમિત્રિવત્સલઃ ॥ 5 ॥

જિવ્હાં વિદ્યાનિધિઃ પાતુ કન્ઠં ભરતવન્દિતઃ
સ્કન્ધૌ દિવ્યાયુધઃ પાતુ ભુજૌ ભગ્નેશકાર્મુકઃ ॥ 6 ॥

કરૌ સીતાપતિઃ પાતુ હૃદયં જામદગ્ન્યજિત ।
મધ્યં પાતુ ખરધ્વંસી નાભિં જામ્બવદાશ્રયઃ ॥ 7 ॥

સુગ્રીવેશઃ કટી પાતુ સક્થિની હનુમત્પ્રભુઃ ।
ઊરૂ રઘૂત્તમઃ પાતુ રક્ષઃકુલવિનાશકૃત ॥ 8 ॥

જાનુની સેતુકૃત્પાતુ જંઘે દશમુખાન્તકઃ ।
પાદૌ બિભીષણશ્રીદઃ પાતુ રામોખિલં વપુઃ ॥ 9 ॥

એતાં રામબલોપેતાં રક્ષાં યઃ સુકૃતી પઠેત ।
સ ચિરાયુઃ સુખી પુત્રી વિજયી વિનયી ભવેત ॥ 10 ॥

પાતાલ ભૂતલ વ્યોમ ચારિણશ્છદ્મચારિણઃ ।
ન દ્રષ્ટુમપિ શક્તાસ્તે રક્ષિતં રામનામભિઃ ॥ 11 ॥

રામેતિ રામભદ્રેતિ રામચંદ્રેતિ વા સ્મરન ।
નરો ન લિપ્યતે પાપૈઃ ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ 12 ॥

જગજ્જૈત્રૈક મંત્રેણ રામનામ્નાટભિરક્ષિતમ ।
યઃ કન્ઠે ધારયેતસ્ય કરસ્થાઃ સર્વસિદ્ધયઃ ॥ 13 ॥

વજ્રપંજરનામેદં યો રામકવચં સ્મરેત ।
અવ્યાહતાજ્ઞઃ સર્વત્ર લભતે જયમંગલમ ॥ 14 ॥

આદિષ્ટવાન યથા સ્વપ્ને રામરક્ષાં ઈમાં હરઃ ।
તથા લિખિતવાન પ્રાતઃ પ્રભુદ્ધો બુધકૌશિકઃ ॥ 15 ॥

આરામઃ કલ્પવૃક્ષાણાં વિરામઃ સકલાપદામ ।
અભિરામસ્ત્રિલોકાનાં રામઃ શ્રીમાન સ નઃ પ્રભુઃ ॥ 16 ॥

તરુણૌ રૂપસંપન્નૌ સુકુમારૌ મહાબલૌ ।
પુંડરીકવિશાલાક્ષૌ ચીરકૃષ્ણાજિનામ્બરૌ ॥ 17 ॥

ફલમૂલાશિનૌ દાન્તૌ તાપસૌ બ્રહ્મચારિણૌ ।
પુત્રૌ દશરથસ્યૈતૌ ભ્રાતરૌ રામલક્ષ્મણૌ ॥ 18 ॥

શરણ્યૌ સર્વસત્ત્વાનાં શ્રેષ્ઠૌ સર્વધનુષ્મતામ ।
રક્ષઃ કુલનિહંતારૌ ત્રાયેતાં નો રઘૂત્તમૌ ॥ 19 ॥

આત્તસજ્જ ધનુષાવિષુ સ્પૃશા વક્ષયાશુગ નિષંગ સંગિનૌ ।
રક્ષણાય મમ રામલક્ષ્મણાવગ્રતઃ પથિ સદૈવ ગચ્છતામ ॥ 20 ॥

સન્નદ્ધઃ કવચી ખડ્ગી ચાપબાણધરો યુવા ।
ગચ્છન્મનોરથોસ્માકં રામઃ પાતુ સલક્ષ્મણઃ ॥ 21 ॥

રામો દાશરથિઃ શૂરો લક્ષ્મણાનુચરો બલી ।
કાકુત્સ્થઃ પુરુષઃ પૂર્ણઃ કૌસલ્યેયો રઘૂત્તમઃ ॥ 22 ॥

વેદાન્તવેદ્યો યજ્ઞેશઃ પુરાણપુરુષોત્તમઃ ।
જાનકીવલ્લભઃ શ્રીમાન અપ્રમેય પરાક્રમઃ ॥ 23 ॥

ઈત્યેતાનિ જપન્નિત્યં મદ્ભક્તઃ શ્રદ્ધયાન્વિતઃ ।
અશ્વમેધાધિકં પુણ્યં સંપ્રાપ્નોતિ ન સંશયઃ ॥ 24 ॥

રામં દુર્વાદલશ્યામં પદ્માક્ષં પીતવાસસમ ।
સ્તુવંતિ નામભિર્દિવ્યૈ: ન તે સંસારિણો નરઃ ॥ 25 ॥

રામં લક્ષ્મણપૂર્વજં રઘુવરં સીતાપતિં સુંદરમ ।
કાકુત્સ્થં કરુણાર્ણવં ગુણનિધિં વિપ્રપ્રિયં ધાર્મિકમ ।
રાજેન્દ્રં સત્યસંધં દશરથતનયં શ્યામલં શાંતમૂર્તિમ ।
વન્દે લોકાભિરામં રઘુકુલતિલકં રાઘવં રાવણારિમ ॥ 26 ॥

રામાય રામભદ્રાય રામચંદ્રાય વેધસે ।
રઘુનાથાય નાથાય સીતાયાઃ પતયે નમઃ ॥ 27 ॥

શ્રીરામ રામ રઘુનંદન રામ રામ ।
શ્રીરામ રામ ભરતાગ્રજ રામ રામ ।
શ્રીરામ રામ રણકર્કશ રામ રામ ।
શ્રીરામ રામ શરણં ભવ રામ રામ ॥ 28 ॥

શ્રીરામચંદ્રચરણૌ મનસા સ્મરામિ ।
શ્રીરામચંદ્રચરણૌ વચસા ગૃણામિ ।
શ્રીરામચંદ્રચરણૌ શિરસા નમામિ ।
શ્રીરામચંદ્રચરણૌ શરણં પ્રપદ્યે ॥ 29 ॥

માતા રામો મત્પિતા રામચંદ્રઃ ।
સ્વામી રામો મત્સખા રામચંદ્રઃ ।
સર્વસ્વં મે રામચંદ્રો દયાલુઃ ।
નાન્યં જાને નૈવ જાને ન જાને ॥ 30 ॥

દક્ષિણે લક્ષ્મણો યસ્ય વામે તુ જનકાત્મજા ।
પુરતો મારુતિર્યસ્ય તં વંદે રઘુનંદનમ ॥ 31 ॥

લોકાભિરામં રણરંગધીરમ ।
રાજીવનેત્રં રઘુવંશનાથમ ।

કારુણ્યરૂપં કરુણાકરં તમ ।
શ્રીરામચંદ્રં શરણં પ્રપદ્યે ॥ 32 ॥

મનોજવં મારુતતુલ્યવેગમ ।
જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ ।
વાતાત્મજં વાનરયૂથમુખ્યમ ।
શ્રીરામદૂતં શરણં પ્રપદ્યે ॥ 33 ॥

કૂજંતં રામ રામેતિ મધુરં મધુરાક્ષરમ ।
આરુહ્ય કવિતાશાખાં વંદે વાલ્મીકિકોકિલમ ॥ 34 ॥

આપદાં અપહર્તારં દાતારં સર્વસંપદામ ।
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ ॥ 35 ॥

ભર્જનં ભવબીજાનાં અર્જનં સુખસમ્પદામ ।
તર્જનં યમદૂતાનાં રામ રામેતિ ગર્જનમ ॥ 36 ॥

રામો રાજમણિઃ સદા વિજયતે રામં રમેશં ભજે ।
રામેણાભિહતા નિશાચરચમૂ રામાય તસ્મૈ નમઃ ।
રામાન્નાસ્તિ પરાયણં પરતરં રામસ્ય દાસોસ્મ્યહમ ।
રામે ચિત્તલયઃ સદા ભવતુ મે ભો રામ મામુદ્ધર ॥ 37 ॥

રામ રામેતિ રામેતિ રમે રામે મનોરમે ।
સહસ્રનામ તત્તુલ્યં રામનામ વરાનને ॥ 38 ॥

॥ ઈતિ શ્રીબુધકૌશિકવિરચિતં શ્રીરામરક્ષાસ્તોત્રં સંપૂર્ણમ ॥

॥ શ્રીસીતારામચંદ્રાર્પણમસ્તુ ॥